## सप्तमः पाठः

# दीपोत्सवः

(सप्तमी विभक्ति का प्रयोग)

[प्रस्तुत पाठ में प्रसिद्ध भारतीय उत्सव दीपावली का वर्णन है। इसकी प्राचीन परम्परा वर्षाकाल में उत्पन्न दूषित तत्वों के विनाश तथा हर्षोल्लास प्रकट करने के उद्देश्य की पूर्ति करती थी। आज आनन्द का प्रकाश तो है किन्तु दीपकों के स्वरूप बदलने तथा पटाखा आदि के अनियन्त्रित प्रयोग से वायुमंडल दूषित हो जाता है। अतः इसके मनाने का स्वरूप बदलना चाहिए।]



अस्माकं समारोहेषु दीपोत्सवः विशिष्टः। दीपोत्सवः सामान्यतः दीपावली दिवाली वा नाम्ना ज्ञायते। प्रकाशोत्सवः अयं बालानां चित्तानि हरति। गृहेषु, हट्टेषु, चत्वरेषु, आपणेषु सर्वत्र दीपानां मालाः शोभन्ते।

कार्तिकमासस्य अमावस्यायां तिथौ प्रतिवर्षं भारतीया इमम् उत्सवं समायोजयन्ति। शारदीयः अयम् उत्सवः। वर्षायाम् ऋतौ सर्वत्र वर्षाणां प्रभावेण अस्वच्छता, कीटपतंगानां प्रसारश्च भवति। यदा शरद् आयाति तदा जनाः स्वगृहं परिसरं च स्वच्छं कुर्वन्ति। ते गृहाणि सुधया लिम्पन्ति। कपाटगवाक्षादीन् रञ्जयन्ति। इतस्ततः क्षिप्तम् अपद्रव्यम् अपसारयन्ति। सर्वत्र निर्मलता निवसति।

नवं वस्त्रं मिष्टान्नं च लब्ध्वा बाला मुदिताः भ्रमन्ति । ते पटाखाविस्फोटं **कृत्वा आनन्दमनुभवन्ति। जनाः** परस्परं शुभकामनां प्रकटयन्ति । सर्वत्र बन्धुभावः विराजते ।

**रावणवधानन्तरं रामचन्द्रस्य अयोध्यागमने प्रथमः दीपोत्सवः आयोजितः इति जनश्रुतिः । तदा प्रभृति वयम् अस्य आयोजनं कुर्मः ।अस्मिन् पर्वणि जनाः रात्रौ स्व-स्वगृहं दीपमालिकया अलङ्कुर्वन्ति । धनस्य देवीं लक्ष्मीं पूजयन्ति । निर्धनतां निस्सारयन्ति । इयं रात्रिः सुखरात्रिः इति नाम्ना विख्याता । मिथिलायां बंगप्रदेशे च केचन देवीं कालिकां पूजयन्ति ।**

वर्षाकाले वृद्धिम् उपगतानां कीटपतङ्गानां पुरा तैलवर्तिकाभिः विनाशो **भवति स्म । तेन** पर्यावरणं शुद्धं भवति स्म । अद्य तु वयं मोमवर्तिकानां विद्युद्दीपानां च प्रयोगं कुर्मः । **उल्लासप्रकटनाय** पटाखाविस्फोटः **च भवति । अनेन** वातावरणे **दूषितः पदार्थः वर्धते । कीटा न नश्यन्ति । वातावरणं** च **विषयुक्तं भवति । ध्वनिप्रदूषणं** चापि **वर्धते । अतः** सावधानेन भवितव्यम् । स्वरक्षणाय पर्यावरणरक्षणं **परमं कर्तव्यम् ।**

## शब्दार्थः

| | | |
|---|---|---|
| नाम्ना | = | नाम से |
| ज्ञायते | = | जाना जाता है |
| विपणिषु | = | बाजारों में |
| चत्वरेषु | = | चौराहों पर, चबूतरों पर |
| आपणेषु | = | दुकानों में |
| शारदीयः | = | शरत्कालीन |
| कीटपंतगानाम् | = | कीड़ों-फतिंगों का |
| सुधया ( सुधा + तृतीया ) | = | चूने से |
| लिम्पन्ति | = | लीपते / लीपती हैं |
| कपाटः | = | किवाड़ |
| गवाक्षः | = | खिड़की |

रञ्जयन्ति = रंगते / रंगती हैं
इतस्ततः = इधर-उधर
प्रक्षिप्तम् = बिखरा / बिखरे (को)
अपद्रव्यम् = कूड़ा-करकट
अपसारयन्ति = दूर हटाते / हटाती हैं
नवम् = नया
मिष्टान्नम् = मिठाई
मुदिताः = प्रसन्न, खुश
जनश्रुतिः = जन-प्रसिद्धि
तदा प्रभृति = तब से
निस्सारयन्ति = निकालती / निकालते हैं
वर्तिका = बत्ती
परमम् = सबसे बड़ा
लब्ध्वा = प्राप्त करके
आयाति = आता है
वृद्धिम् उपगतानाम् (वृद्धिम्+उपगतानाम्) = बढ़े हुए का
वर्धते = बढ़ता है
सावधानेन = सावधानी से
भवितव्यम् = होना चाहिए
संमायोजयन्ति = मनाते हैं
रावणवधानन्तरम् (रावणवध+अनन्तरम्) = रावण के वध के बाद
पर्वणि = पर्व में
अलङ्कुर्वन्ति = सजाते हैं
प्रसारः = फैलाव, वृद्धि

# व्याकरणम्

## सन्धि-विच्छेदः

| | | |
|---|---|---|
| दीपोत्सवः | = | दीप + उत्सवः (गुणसन्धिः) |
| प्रकाशोत्सवः | = | प्रकाश + उत्सवः (गुणसन्धिः) |
| प्रसारश्च | = | प्रसारः + च (विसर्गसन्धिः) |
| इतस्ततः | = | इतः + ततः (विसर्गसन्धिः) |
| मिष्टान्नम् | = | मिष्ट + अन्नम् (दीर्घसन्धिः) |
| अयोध्यागमने | = | अयोध्या + आगमने (स्वरसन्धिः) |
| निस्सारयन्ति | = | निः + सारयन्ति (विसर्गसन्धिः) |

## प्रकृति-प्रत्यय-विभागः

| | | |
|---|---|---|
| ज्ञायते | = | √ज्ञा, यक्, लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| हरति | = | √हृ, लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| शोभन्ते | = | √शुभ्, लट्लकारः, प्रथमपुरुषः, बहुवचनम् |
| समायोजयन्ति | = | सम् + आ + √युज् + णिच्, लट्लकारः, प्रथमपुरुषः, बहुवचनम् |
| लिम्पन्ति | = | √लिप्, लट्लकारः, प्रथमपुरुषः, बहुवचनम् |
| रञ्जयन्ति | = | √रञ्ज् + णिच्, लट्लकारः, प्रथमपुरुषः, बहुवचनम् |
| अपसारयन्ति | = | अप + √सृ + णिच्, लट्लकारः, प्रथमपुरुषः, बहुवचनम् |
| निवसति | = | नि + √वस् , लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| भ्रमन्ति | = | √भ्रम्, लट्लकारः, प्रथमपुरुषः, बहुवचनम् |
| प्रकटयन्ति | = | प्र + √कट्, णिच्, लट्लकारः, प्रथमपुरुषः, बहुवचनम् |
| विराजते | = | वि + √राज्, लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| पूजयन्ति | = | √पूज् + णिच्, लट्लकारः, प्रथमपुरुषः, बहुवचनम् |

निस्सारयन्ति = निः + √सृ + णिच्, लट्लकारः, प्रथमपुरुषः, बहुवचनम्

नश्यन्ति = √नश्, लट्लकारः, प्रथमपुरुषः, बहुवचनम्

वर्धते = √वृध्, लट्लकारः, प्रथमपुरुषः, एकवचनम्

भवितव्यम् = भू + तव्यत्

कर्तव्यम् = कृ + तव्यत्

मुदिताः = मुद् + क्त (बहुवचनम्)

कृत्वा = कृ + क्त्वा

लब्ध्वा = लभ् + क्त्वा

## अभ्यासः

### मौखिकः

1. निम्नलिखिताः उत्सवाः कस्मिन् भारतीये मासे आयोज्यन्ते ?

(क) होलिकोत्सवः – ..............................

(ख) सरस्वतीपूजनम् – ..............................

(ग) रक्षाबन्धनम् – ..............................

(घ) सूर्यषष्ठी (छठव्रतः) – ..............................

(ङ) दुर्गापूजा – ..............................

2. प्रदूषणविषये पञ्च वाक्यानि वदत ।

3. दशभारतीयभाषाणां नामानि वदत ।

**लिखितः**

4. मञ्जूषातः शब्दं चित्वा रिक्तस्थानानि पूरयत –

| भ्रमराः, | राष्ट्रगानं, | पठामः, | संस्कृतस्य, | रावणं |
|---|---|---|---|---|

(क) रामचन्द्रः .................... हतवान् ।

(ख) वयं सप्तमवर्गे .................... ।

(ग) फातिमा .................... गायति ।

(घ) .................... उद्यानेषु भ्रमन्ति ।

(ङ) कालिदासः .................... महाकविः आसीत् ।

5. रिक्तस्थानानि पूरयत –

| | | | |
|---|---|---|---|
| (क) | कपाटः | कपाटाभ्याम् | .................... |
| | लतया | .................... | लताभिः |
| | लतायाम् | .................... | .................... |
| | .................... | कक्षयोः | कक्षासु |
| | गृहस्य | .................... | .................... |
| (ख) | पठतु | .................... | पठन्तु |
| | .................... | पठतम् | .................... |
| | पठानि | .................... | .................... |

6. संस्कृतभाषायाम् उत्तराणि लिखत –

(क) दीपोत्सवः कस्मिन् मासे भवति ?

(ख) जनाः सुधया कानि लिम्पन्ति ?

(ग) बालाः किं किं लब्ध्वा प्रसीदन्ति ?

(घ) त्वं कस्मिन् वर्गे पठसि ?

(ङ) तव विद्यालये कियन्तः प्रकोष्ठाः सन्ति ?

(च) अधुना पर्यावरणं कीदृशम् अस्ति ?

(छ) घर्षणेन का दहति ?

7.(क) रिक्तस्थानानि पूरयत -

| इदं, | अयं, | इयं, | सः, | सा, | तत् |
|---|---|---|---|---|---|

(i) .................... पुस्तकम् ।

(ii) .................... पुस्तकम् ।

(iii) .................... बालकः ।

(iv) .................... बालकः ।

(v) .................... लेखनी ।

(vi) .................... लेखनी ।

(ख) (i) अस्य .................... । (बालकस्य / बालकयोः)

(ii) तस्मिन् .................... । (विद्यालये / विद्यालयस्य)

(iii) .................... पर्वणि । (अस्य / अस्मिन्)

(iv) तस्मै .................... । (बालकेन / बालकाय)

(v) .................... वर्गात् । (कस्मात् / केभ्यः)

(vi) .................... कक्षायाम् । (तस्यां / तस्मिन्)

8. वर्गप्रहेलीतः धातुरूपं निस्सारयत -

| | | | | | |
|---|---|---|---|---|---|
| ति | प | ठ | थः | न्ति | मः |
| प | ठ | सि | प | ठा | मि |
| ठ | ति | प | ठ | थ | प |
| न्ति | प | ठ | तः | ठा | ठा |
| प | ठा | मः | प | मः | वः |

9. हिन्दीभाषायाम् अनुवदत -

(क) अस्माकं देशे बहवः समारोहाः भवन्ति ।

.................................................................................................

(ख) भारतस्य संस्कृतिः प्राचीना समृद्धा चास्ति ।

.................................................................................................

(ग) नार्यः यत्र पूज्यन्ते रमन्ते तत्र देवताः ।

.................................................................................................

(घ) सत्यं ब्रूयात् प्रियं ब्रूयात् ।

.................................................................................................

(ङ) पाण्डवाः पञ्च भ्रातरः आसन् ।

.................................................................................................

10. 'दुर्गापूजा' पर्व का वर्णन करें ।

11. निम्नलिखितानां समानार्थकशब्दानां मेलनं कुरुत -

| | | | |
|---|---|---|---|
| (क) रावणः | - | (i) | राघवः |
| (ख) रामचन्द्रः | - | (ii) | दीपावली |
| (ग) दीपोत्सवः | - | (iii) | श्रीः |
| (घ) लक्ष्मीः | - | (iv) | सदनम् |
| (ङ) गृहम् | - | (v) | दशाननः |

## योग्यता-विस्तार:

शरद ऋतु म कार्तिक अमावास्या की रात्रि में दीपमाला जलाने की परम्परा भारतीय संस्कृति रही है। यह ऋतु उत्साह तथा विजय का बोध कराती है। कहा जाता है कि राम की का-विजय के आनंद को मनाने के लिए अयोध्यावासियों ने दीपोत्सव का आयोजन किया था। उत्सव के आगे-पीछे भी कई पर्व होते हैं। दीपावली के दो दिन पूर्व कार्तिक कृष्ण त्रयोदशी आयुर्वेद (स्वास्थ्य) के प्रवर्तक धन्वन्तरि की जयन्ती मनाई जाती है। उस रात्रि में मृत्यु के ता यम को दीपक देने की प्रथा भी पर्याप्त प्रचलित है। कहीं-कहीं यह दीपक दीवाली के एक न पूर्व चतुर्दशी की रात्रि में दिया जाता है। दीपावली की रात्रि में लक्ष्मी पूजा होती है। वे द्धि की देवी मानी जाती हैं। उनके स्वागत में घर के एक-एक स्थान को प्रकाशित किया जाता। दीपावली के दूसरे दिन गोवर्धन-पूजा होती है। अपनी-अपनी गायों को लोग सजाते-सँवारते। दीपावली के तीसरे दिन भ्रातृद्वितीया (भाईदूज) का समारोह होता है। बहनें अपने भाइयों की र्घायु के लिए यम की पूजा करके उन्हें मिठाई खिलाती हैं। उसी दिन चित्रगुप्त की भी पूजा की ती है।

दीपावली के क्रम में कार्तिक शुक्लपक्ष में चार दिनों का छठव्रत किया जाता है। इसके म दिन संयत अर्थात् शुद्ध आहार, दूसरे दिन एक बार संध्या में खीर का भोजन (खड़ना), सरे दिन उपवास करते हुए अस्ताचलगामी सूर्य को अर्घ्यदान तथा चौथे दिन उदयाचल स्थित र्य को अर्घ्य देकर व्रत का पारण किया जाता है। बिहार तथा बिहारियों से युक्त अन्य प्रदेशों इस व्रत का बहुत महत्त्व है। कार्तिक पूर्णिमा भी अपने-आप में प्रसिद्ध पर्व है। उस दिन द ऋतु की विदाई होती है। अनेक स्थानों में नदी-स्नान तथा मेलों का दृश्य मनोरम होता। इस प्रकार दीपावली अत्यन्त महत्त्वपूर्ण पर्व है जो अनेक पर्वों को अपने पार्श्व में समेटे हुए।

दीपावली में दीप जलाने का वैज्ञानिक महत्त्व था कि अपने गृह-परिसर को लोग स्वच्छ ायें, वर्षाकाल की सारी गन्दगी दूर करें, कीट-पतंगों को जलते हुए दीपकों से नष्ट करें तथा ुर अन्न का आस्वादन करें।

*****